# Sayankalina Shri Bhagavat Stuti

# શ્રીભગવત્સ્તુતિઃ સાયઙ્કાલીન

## Document Information

Text title : Sayankalina Shri Bhagavat Stuti

File name : bhagavatstutiHsAyankAlIna.itx

Category : vishhnu, nimbArkAchArya, krishna, stuti

Location : doc_vishhnu

Author : shrIjI

Proofread by : Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

# શ્રીભગવત્સ્તુતિઃ સાયઙ્કાલીન

શ્રીહંસઞ્ચ સનત્કુમારપ્રભૃતીન્ વીણાધરં નારદં
  નિમ્બાદિત્યગુરૂંશ્ચ દ્વાદશગુરૂન્ શ્રીશ્રીનિવાસાદિકાન્ ।
વન્દે સુન્દરભટ્ટદેશિકમુખાન્ વસ્વિન્દુસઙ્ખ્યાયુતાન્
  શ્રીવ્યાસાદ્ધરિમધ્યગાઞ્ચ પરતઃ સર્વાન્ ગુરૂન્સાદરમ્ ॥ ૧॥

હે નિમ્બાર્ક! દયાનિધે! ગુણનિધે! હે ભક્તચિન્તામણે!
  હે આચાર્યશિરોમણે! મુનિગણૈરામૃગ્યપાદામ્બુજ! ।
હે સૃષ્ટિસ્થિતિપાલક! પ્રભવન! હે નાથ! માયાધિપ!
  હે ગોવર્દ્ધનકન્દરાલય! વિભો! માં પાહિ સર્વેશ્વર! ॥ ૨॥

કસ્તૂરીતિલકં લલાટપટલે વક્ષઃસ્થલે કૌસ્તુભં
  નાસાગ્રે વરમૌક્તિકં કરતલે વેણુઃ કરે કઙ્કણમ્ ।
સર્વાઙ્ગે હરિચન્દનં સુલલિતં કણ્ઠે ચ મુક્તાવલી
  ગોપસ્ત્રીપરિવેષ્ટિતો વિજયતે ગોપાલચૂડામણિઃ ॥ ૩॥

ફુલ્લેન્દીવરકાન્તિમિન્દુવદનં બર્હાવતંસપ્રિયં
  શ્રીવત્સાઙ્કમુદારકૌસ્તુભધરં પીતામ્બરં સુન્દરમ્ ।
ગોપીનાં નયનોત્પલાર્ચિતતનું ગોગોપસઙ્ઘાવૃતં
  ગોવિન્દં કલવેણુવાદનપરં દિવ્યાઙ્ગભૂષં ભજે ॥ ૪॥

હે રાધે! વૃષભાનુભૂપતનયે! હે પૂર્ણચન્દ્રાનને!
  હે કાન્તે! કમનીય-કોકિલરવે! વૃન્દાવનાધીશ્વરિ! ।
હે મત્પ્રાણપરાયણે! ચ રસિકે! હે સર્વયૂથેશ્વરિ!
  આગત્ય ત્વરિતં પ્રતપ્તમનિશં માં દીનમાનન્દય ॥ ૫॥

હે રાધે! વૃષભાનુભૂપતનયે! સર્વેશ્વરી! રાધિકે,
  હે કૃષ્ણાનન-પઙ્કજ-ભ્રમરિકે કૃષ્ણપ્રિયે માધવિ ।
હે વૃન્દાવનનાગરી ગુણગુરો દામોદરપ્રેયસિ
  હે હે શ્રીલલિતાદિક-પ્રિયસખિ પ્રાણાધિકે પાહિ મામ્ ॥ ૬॥

સિઞ્જન્નૂપુરપાદપદ્મયુગલાં હંસીગતિં બિભ્રતીં
    ચઞ્ચત્ખઞ્જનમઞ્જુલોચનયુગાં પીનોલ્લસત્કન્ધરામ્ ।
શુમ્ભત્કાઞ્ચનકઙ્કણદ્યુતિમિલત્પાણૌ ચલચ્ચામરં
    કુર્વાણાં હરિરાધિકોપરિ સદા શ્રીરઙ્ગદેવીં ભજે ॥ ૭॥

શ્રીરઙ્ગાદિસુદેવિકા ચ લલિતા વૈશાખિકા ચમ્પિકા
    ચિત્રા તુઙ્ગસખીન્દુલેખિક-પરા ચાષ્ટૌ પ્રધાનપ્રિયાઃ ।
અન્યાઃ સન્તિ મનોહરાઃ પ્રિયતમા નિત્યં નવીનાયિતાઃ
    વન્દે તચ્ચરણારવિન્દમનિશં દાસોઽસ્મ્યહં શ્રદ્ધયા ॥ ૮॥

સ્વભાવતોઽપાસ્તસમસ્તદોષ-
    મશેષકલ્યાણગુણૈકરાશિમ્ ।
વ્યૂહાઙ્ગિનં બ્રહ્મ પરં વરેણ્યં
    ધ્યાયેમ કૃષ્ણં કમલેક્ષણં હરિમ્ ॥ ૯॥

અઙ્ગે તુ વામે વૃષભાનુજાં મુદા
    વિરાજમાનામનુરૂપસૌભગામ્ ।
સખીસહસ્રૈઃ પરિસેવિતાં સદા
    સ્મરેમ દેવીં સકલેષ્ટકામદામ્ ॥ ૧૦॥

નાન્યા ગતિઃ કૃષ્ણપદારવિન્દાત્
    સન્દૃશ્યતે બ્રહ્મશિવાદિવન્દિતાત્ ।
ભક્તેચ્છયોપાત્તસુચિન્ત્યવિગ્રહા-
    દચિન્ત્યશક્તેરવિચિન્ત્યસાશયાત્ ॥ ૧૧॥

અહો દયાલો સ્વદયાવશેન વૈ
    પ્રપશ્ય માં પ્રાપય પાદસેવને ।
યથા પુનર્મે વિષયેષુ માધવ !
    રતિર્ન ભૂયાદ્ધિ તથૈવ સાધય ॥ ૧૨॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવ દેવ ॥ ૧૩॥

ઇતિ સાયઙ્કાલીન શ્રીભગવત્સ્તુતિઃ સમાપ્તા ।

Proofread by Mohan Chettoor

*Sayankalina Shri Bhagavat Stuti*

pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*